## ।। अथ विंशोऽध्याय: ।। Chapter-20

वसिष्ठ उवाच :-ततो गच्छेन्नरश्रेष्ठ[1] तीर्थं जगति विश्रुतम् ।
सर्वसिद्धिकरी देवी यत्रास्ते वटयक्षिणी ।। १

भूतमातेति विख्याता पुरा राजन् महेश्वरी ।
आययौ सा निवासाय श्रीमालं क्षेत्रमुत्तमम् ।। २

सर्वत: परिबभ्राम वीक्षमाणा निजाश्रयम् ।
शून्यं किंचिदपि स्थानं न ददर्श समंतत: ।। ३

न तत्सरो न सा वापी न कूपो न सुरालय: ।
यत्र सन्ति न देवांशा: स्थिता: श्रीमालसीमनि ।। ४

एवं परिभ्रमन्ती सा सुचिरं भूतमातृका ।
निरैक्षत घनच्छायं वटमेकं महोन्नतम्[2] ।। ५

निवत्स्याम्यहमत्रैव सुखमित्थं विचिन्त्य वै ।
आययौ नृपभूतानां शतै: पंचभिरावृता ।। ६

-0-0-

१ ई गच्छेतराजेन्द्रातीर्थं
२ इ महोत्तमं

यदोपविंशतिप्रीतासा तीर्थबुद्ध्या परंतप ।
तावदाविर्बभौ यक्षः पिंगाक्षः शक्तिमृद्बली ।।

यक्षैः परिवृतो देवीमिदं वचनमब्रवीत् ।। ७

पिंगाक्ष उवाचः- नात्र स्थेयं त्वया देवि पूर्वाङ्घ्रं[1] मत्परिग्रहः ।
वसाम्यहमहं यक्षैरावृतः पंचभिः शतैः ।। ८

भूतमातोवाच :- परिभ्रान्तं मया सर्वं श्रीमाले यक्षसत्तम[2] ।
न शून्यं दृश्यते किंचित् स्थितिर्यत्र चिरं भवेत् ।। ९

अतस्त्वमन्यतो गच्छ वस यक्षैः सह द्रुतम् ।
यतोऽहमत्र तिष्ठामि तुष्टस्ते भविता हरः ।। १०

पिंगाक्ष उवाच :- भूतमातर्न ते युक्तमात्मार्थे मन्निराकृतिः ।
सर्वे परिवृता वृक्षाः श्रीमाले देव्यानिभिः ।। ११

किंकरोऽहं कुबेरस्य सख्युरन्धकविद्विषः ।
अतस्त्वमन्यतो याहि तव तुष्यति शंकरः ।। १२

-o-

१ सी ई यक्षसतम
(ए१) पूर्वाङ्घ्रं

भूतमातोवाच :- लोकानामीश्वरी यद्वा प्रिया चाहं कपर्दिनः ।।
न्यग्रोधो मे भवत्वेषस्त्वमतो व्रज मा चिरम् ।। १३

पिंगाक्ष उवाच :- प्रियः सर्वोपि लोकेस्मिन्नुसर्वस्यप्रणतोजनः ।
स्थितस्यसर्वकर्तृत्वेना स्तिशम्भोः प्रियाप्रियम् ।। १४

भेदभिन्नास्मृताः शास्त्रेचामुण्डाकोठयोनव ।
यदिस्युःकामचारास्तास्तत्किंजीवेदिदंजगत् ।। १५

भूतमातोवाच :- को नाम: किमितिप्रोक्तो यद्वानु स विदधे विधः ।
न नीतिस्तेषु नो लज्जा याहि यदा जिजीविषुः ।।१६

जातोऽसि त्वं यथा भूतान्द्भूतः सार्द्धं दुरात्मभिः ।।
तथा जानामि त्वां भूतं किमित्थं बहु कत्थसे ।। १७

वसिष्ठ उवाच :- इत्युक्त्वा सा तदा देवी भूतमाता सहानुगा ।
क्रुद्धा ललाटे भृकुटी बध्वा पिंगमभ्रवीत् ।। १८

-०-

३ ई सी भृकुटि
१ ई कादाम:
२ ई यदानुविदधे

(ए१) जातासि
(ए२) भूतां वै
(ए३) वित्

भूतमातोवाच :- न ते पादस्य[1] शिरसो भेदः कश्चन विद्यते ।
मूढमामेवमश्लीलैर्वाक्यैर्यदभितर्जसि ।। १९

तिष्ठ तिष्ठ ततो दुष्ट शक्तिः कापि यदस्ति ते ।
मम तृप्यन्तु भूतानि मांसैरद्य हतस्य ते ।। २०

वसिष्ठ उवाच :- भूतमातुर्वचः श्रुत्वा पिंगाक्षो यक्षराट् ततः ।।
सह यक्षैः करालास्यैर्वटस्थो योद्धुमुद्यतः ।। २१

भूतान्यपि महीपाल भूतमात्रा समं तदा ।
विवृतदंष्ट्रनेत्राणि चुक्षुभुर्यक्षतर्जनात्[2] ।। २२

ततः प्रववृते युद्धं तुमुलं लोमहर्षणम् ।।
सेनयोर्भूतयक्षाणां तत्र न्यग्रोधतले ।। २३

पाषाणैर्लगुडैर्दण्डैः काष्ठैः शूलपरश्वधैः ।
शक्तिभिर्मुशलै रौद्रैर्दन्तैश्च नखचर्वणैः ।। २४

-०-

१ ई सी पापस्य
२ ई बी चक्षुर्यक्षस्य तर्जनम्

पाणिपादतलाघातैः मुष्टिभिश्च परस्परम् ।
तदा युयुधिरे राजन् क्रुद्धा ज्वालाविलेमुखिः ।। २५

देवी क्रुद्धा थपिंगाक्षमहनत्तीक्ष्णशक्तिभिः ।।
पिंगाक्षोऽपि भृशं क्रुद्धो देवीमभ्यहनच्छरैः ।। २६

अथ ब्रह्मालयाद् ब्रह्मा सरसः प्राप्तवान् विभुः ।
न्ययारवच्च तौ राजन् क्षतांगौ शोणितोक्षितौ।। २७

ब्रह्मोवाच :- किं कृतमुद्यता देवि त्वमिदं लोकगर्हितम् ।
पुत्रस्तव महेशानि यक्षः किं तत्र कुप्यसि ।। २८

अहो वीर सुभद्रं ते पिंगाक्ष ध्यायि चेतसा ।
भूतमातुर्जगन्मातुः पार्वत्या भूतहेतवे । २९

अवतारोऽयं भुवि ख्यातस्त्रिदशैरपि वन्दितः ।।
अतः प्रसाद्य देवेशी शीघ्रं न्यग्रोधमर्पय ।। ३०

-०-

अतः

२ ई बी प्रसाद्य भक्त्या

१ ई राजन् देवीमभ्यहनबरैः अथब्रह्मा

वसिष्ठ उवाच :-तच्छ्रुत्वा ब्रह्मणो वाक्यं पिंगाक्षः पृथिवीपते ।
यत्नान्निवार्य संग्रामादिदं देवीमथाब्रवीत् ।। ३१

पिंगाक्ष उवाच :-प्रसीद भूतमातस्त्वं गृहाणेमं महाद्रुमम् ।
वयमन्यत्र यास्यामो मान्यन्तः पितामहम् ।। ३२

त्वं माता जगतां देवी कस्त्वां योद्धुं क्षमो भवेत् ।
बाल्यादत्र कृतं यन्मे तन्मातः क्षन्तुमर्हसि ।। ३३

वसिष्ठ उवाच :- इति प्रसाद्य पिंगाक्षः क्षमया पद्मजन्मनः ।
न्यग्रोधादपचक्राम भूताम्बां प्रणमन्मुहुः ३४

तुष्टा तस्य ततो राजन्नुवाचेदं सुरेश्वरी ।। ३५

भूतमातोवाच :- वरं वरय पिंगाक्ष यत्ते मनसि वर्तते ।
सान्त्वनात्तव तुष्टास्मि सह भूतगणैरपि ।। ३६

कारणात्कोपमुत्पन्नं निगृह्णन्ति तथैवं ये ।
प्रबोधिताः परेणापि न ते स्युर्यदा दुःखिनः ।। ३७

-o-

१ ई- न्यग्रोधादय

पिंगाक्ष उवाच :- यदि तुष्टासि मे देवि दास्यसे मनसेप्सितम् ।
नामास्तु वटयक्षस्य नाम्ना लोकविश्रुतम् ।। ३८

श्री देव्युवाच :- पिंगाक्ष तवनाम्नाहं विख्याता वटयक्षिणी ।
अत्र स्थिता प्रदास्यामि भक्तानामभयं परम् ।। ३९

इमं ये कीर्तयिष्यन्ति लोकाः संवादमावयोः ।
भूतेभ्यो न भयं तेषां लोके यक्ष भविष्यति ।। ४०

वसिष्ठ उवाच :- तथेत्युक्त्वाऽथ पिंगाक्षः स्थानमन्यज्जगाम ह ।
ब्रह्मा प्राह महाराज सान्त्वयन् भूतमातरम् ।। ४१

ब्रह्मोवाच :- देवि किं ते करोम्यद्य वाञ्छितं वटयक्षिणि
त्वया मद्भवनात्चण्डि यतः शान्तिरुपाश्रिता ।। ४२

देव्युवाच :- भूतानामिह यक्षिणी युद्धमितरेतरम् ।
पदघातैर्नता भूमिर्दृश्यते कमलासन ।।

इदमस्तु सरो दिव्यं तीर्थकाम-प्रदं भुवि ।। ४३

-०-

१ ए - वाञ्छितवटयाक्षिणी

अत्र वै रथदानेन भोज्यदानेन मानवा: ।
प्राप्नुवन्तु परं कामं प्रसादात्ते पितामह ।। ४४

वसिष्ठ उवाच :- इत्युक्त: प्रययौ ब्रह्मा ब्रह्मालयमथप्रभु: ।।[1]
तदा प्रभृति सा देवी विश्रुता वटयक्षिणी ।। ४५

तस्या: सरसि भूपाल स्नानं कुर्वन्ति ये नरा: ।
यच्छन्ति च रथं विप्रे[2] न तेषां विपद: क्वचित् ।। ४६

-0-

इति श्री स्कंदपुराणे एकाशीति साहस्त्र्यां संहितायां ब्राह्म विभागे तृतीयपरिच्छेदे श्रीमाल माहात्म्ये वटयक्षिणी माहात्म्यं नाम विंशोऽध्याय: ।। २० ।।

-0-

१ ई ब्रह्मालयमथाप्रभु:
२ ए विप्रेन